# संस्कृत वार्ताः

दिनाङ्क :-11.12.2024 प्रात: - 06:55

## अथ वार्ताः

### राष्ट्रपतिः- राष्ट्रियपञ्चायत पुरस्कारः

राष्ट्रपतिः द्रौपदीमुर्मुः अद्य नवदिल्ल्याः विज्ञानभवननामाख्ये सभागारे चतुर्विंशत्यधिकद्विसहस्रतमवर्षस्य राष्ट्रियपञ्चायत-पुरस्कारं प्रदास्यति । अस्मिन् वर्षे विभिन्नेषु वर्गेषु आहत्य पञ्चचत्वारिंशत्-पुरस्कार- विजेतृणां चयनं जातम् | यद्धि मूलस्तरे शासन-सामुदायिक- विकासयोः उपलब्धीनाम् एकां विस्तृतां श्रृङ्खलां प्रदर्शयति । समारोहावधौ पञ्चायतीराजमन्त्री पुरस्कारविजेतृ – पञ्चायतानाम् अभिनवान्वेषि-प्रभावशालीनां प्रथानां विषये एकस्याः पुस्तिकायाः अनावरणं करिष्यति। मन्त्रालयेन एकस्मिन् वक्तव्ये सूचितं यत् एतेषां पुरस्काराणां माध्यमेन अन्यान् पञ्चायतान् उत्तमपद्धतीनां स्वीकरणार्थं प्रेरणाप्रदानमिति लक्ष्यमस्ति।

### प्रधानमन्त्री -तमिलकविः

प्रधानमन्त्री नरेन्द्रमोदी स्वावासे अद्य महान्-तमिल कवेः स्वतन्त्रता-साङ्ग्राम- योद्धुः सुब्रह्मण्यम-भारती-इत्यस्य सम्पूर्ण-रचनानां सङ्ग्रहस्य विमोचनं करिष्यति। अवधेयास्पदं वर्तते यत् सुब्रह्मण्यम्-भारती इत्येतस्य लेखनरचनाः जनेषु देशभक्ति-भावनाः प्रदीप्ताः कृतवत्यः। तस्य सम्पूर्ण-कार्याणां त्रयोविंशति-खण्डानां सङ्ग्रहः एषः सीनी- विश्वनाथन द्वारा सङ्कलितः सम्पादितश्च जातः। अपि च एलायन्स-पब्लिशर्स द्वारा प्रकाशितः जातः। एतस्मिन् सङ्ग्रहे सुब्रह्मण्यमभारत्याः लेखनस्य संस्करणानां स्पष्टीकरणानां विवरणानि समाविष्टानि इति।

### राजनाथसिंहः – रूसयात्रा

रक्षामन्त्री राजनाथसिंहः ह्यः मॉस्कोनगरे रूसदेशीयेन राष्ट्रपतिना व्लादिमीर- पुतिन इत्यमुना सह मन्त्रणां समाचरितवान्। समायोजिते उपवेशनावधौ श्रीसिंहः भारत- रूस देशयोः मध्ये मैत्रीपूर्ण सम्बन्धं प्रकटयन् उक्तवान् यत् नवदिल्ली सर्वदा रूसदेशीयैः मित्रैः सह उपस्थितास्ति इति। रक्षामन्त्रालयेन विज्ञापितं यत् उभौ नेतारौ द्विपक्षीय- रक्षा-सहयोगस्य विभिन्नेषु प्रसङ्गेषु चर्चां कृतवन्तौ।

### भारतीय ऋतुविज्ञानम्

भारतर्तु-विज्ञान-विभागेन तमिलनाडु-कराईकल- पुडुच्चेरी- तटीयान्ध्र- प्रदेश- यनम - रायलसीमा - क्षेत्रेषु अद्य महती वृष्टिः प्रकल्पिता । विभागानुसारि अद्य उपहिमालयीय पश्चिमबङ्गाल - सिक्किम- बिहार- उत्तर प्रदेशेषु प्रातः काले कुञ्झटिकायाः सम्भावना दरीदृश्यते । तत्रैव हिमाचलप्रदेश- असम-मेघालय- नागालैण्ड- मणिपुर - त्रिपुरा- राज्येषु अपि आगामिदिवसे तादृशी स्थितिः अवलोक्यते ।

**राष्ट्रपति:-मानवाधिकार दिवस:**

राष्ट्रपतिपदासीनया द्रौपदीमुर्मु इत्यनया मानवाधिकारदिवसावसरे समेषां सम्मानाधिकारयो: रक्षणक्षमं न्याययुक्तञ्च आङ्किकीयवातावरणं भवेदिति सबलं प्रतिपादितम्। ह्यः नवदिल्ल्यां राष्ट्रियमानवाधिकारायोगेन समायोजितम् मानवाधिकारदिवसकार्यक्रमं सम्बोधयन्ती राष्ट्रपति: उक्तवती यत् आन्तर्जालिकापराधा: जलवायुपरिवर्तनञ्चेति मानवाधिकाराय नूतने सङ्कटे जायमाने स्त:। तया भणितं यत् आंकिकीययुगमिदं परिवर्तनकरम् अस्ति। परमनेन आन्तर्जालिक-अपराधा:, निजताया: हननादय: दोषा: अपि प्रकटिता: वर्तन्ते। ध्यातव्यमस्ति यत् मानवाधिकारदिवस: प्रतिवर्षं दिसम्बरमासस्य दशमे दिनाङ्के परिपाल्यते। अस्य वर्षस्य शीर्षको विद्यते-अस्माकम् अधिकारा: अस्माकं भविष्यं साम्प्रतमेव इति।

**महिलाक्रिकेटिति**

महिलानां क्रिकेट्प्रतिस्पर्धायां तिसृणां प्रतिस्पर्धानाम् एकदिवसीय- शृङ्खलायाः तृतीये अन्तिमे च द्वन्द्वे भारतम् ऑस्ट्रेलियादलं सम्मुखीकरिष्यति।